# Main language SANSKRIT
## paper -2

**Time : 3.15 hours** **X class** **Max. Marks : 100**

सूचनाः – 1. प्रश्नानां समाधानानि समाधानपत्रे एव लेखनीयानि ।

2. प्रश्नपत्रस्य पठनार्थं 15 निमेषाः देयाः ।

3. भाषांशाः इति विभागीय प्रश्नानां समाधानानि समाधानपत्रे एकत्रैव लेखनीयानि ।

---

I. भाषांशाः 20M

अ. रेखाङ्कितपदस्य समुचितं समानार्थकपदं लिखन्तु । $2 \times 1 = 2$

1. सर्वस्य <u>लोचनम्</u> शास्त्रम् ।

2. कूर्मः <u>मन्दं</u> गच्छति ।

आ. रेखाङ्कितपदस्य समुचितं विरुद्धार्थकपदं लिखन्तु । $2 \times 1 = 2$

3. <u>मधुरम्</u> आम्रफलं रुचिकरं भवति ।

4. आपणं प्रति स्यूतं <u>स्वीकृत्य</u> गच्छतु ।

इ. निर्देशानुसारं लिखन्तु । $8 \times 1 = 8$

5. " <u>भिषजम्</u> " इत्यस्य इतरवचने लिखन्तु ।

6. " <u>मधुनि</u> " इति पदस्य विभक्तिं लिखन्तु ।

7. " <u>कथयामि</u> " इत्यस्य इतरवचने लिखन्तु ।

8. " <u>ऐच्छत्</u> " इति क्रियापदस्य वर्मानकाले रूपं लिखन्तु ।

9. अनपत्यः <u>षण्मुखं</u> भजति । ( रेखाङ्कितपदं विघटयत )

10. डेबोरा मत् <u>पुत्रक + इति</u> हिब्रूपदमेव उच्चारितवती । ( रेखाङ्कितपदं सन्धत्त )

11. मतिमान् <u>अर्थनाशम्</u> इति विषयं न प्रकाशयति । ( रेखाङ्कितपदस्य विग्रहवाक्यं लिखन्तु )

12. वेङ्कटरावः ग्रामीणान् <u>सक्रोधम्</u> अवदत् । ( रेखाङ्कितपदस्य समासनाम लिखन्तु )

13. निर्देशानुसारं लिखन्तु ।　　　　　　　　　　　　　　　　　　$4 \times 1 = 4$

i. जनकः स्यूतं नयति ।　　　　　　　　　　(कर्मणिवाक्ये परिवर्तयन्तु )

ii. बालिकया परीक्षा लिख्यते ।　　　　　　　　(कर्तृवाक्ये परिवर्तयन्तु )

iii. मानवाः　　　　　　　　　　　　　　( व्युत्पत्यर्थं लिखन्तु )

iv. अनन्ति जीवन्ति　　　　　　　　　　　(व्युत्पत्तिपदं लिखन्तु )

14.अधः दत्तानि सामान्यवाक्यानि निर्दिष्टप्रत्ययान् उपयुज्य संश्लिष्टवाक्यरूपेण परिवर्तयन्तु ।　　$2 \times 2 = 4$

i. लक्ष्मीः प्रकोष्ठं प्रविशति । लक्ष्मीं जलं पिबति ।　　　( ल्यप् )

ii. शङ्करः अस्माकं परिस्थितिं जानाति । विवाहम् अङ्गीकरोति ।　( त्त्वा )

II. भावावगमनम् – प्रतिस्पन्दनम् ।

15. अधः दत्तं अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।　　　　　$1 \times 4 = 4$

विवाहो नाम वणिग्व्यवहार एवेति विश्वासः वेङ्कटरावस्य ।तस्य मते धनमेव सर्व प्रधानम्।" सर्वं खल्विदं वित्तम् " इति चिन्तयन् सर्वमपि जगत् कनकमयमपश्यत् । एतादृशी चिन्ता कदा वा उद्भूता तस्य मानसे इति न निश्चयेन वक्तुं शक्यते । प्रायः वेद्यकलाशालायां धनिकान् अन्यान् सहाध्यायुनः पश्यन् आत्मानं निर्धनस्य पुत्रं जानन् असौ क्रमशः पितरि द्वेषं , धने चासक्तिं सममेव वर्धयामास ।

i. विवाह विषये वेङ्कटरावस्य अभिप्रायः कः ?

ii. वेङ्कटरावस्य मते किं प्रधानम् ?

iii. वेङ्कटरावः किं चिन्तयन् आसीत् ?

iv. वेङ्कटरावस्य स्वपितुः विषये कीदृशी भावना आसीत् ?

16. अधः दत्तं अनुच्छेदं पठित्वा चत्वारिप्रश्नान् निर्मान्तु ।  $1 \times 4 = 4$

" भगवन् कुतः आगतानि एतानि पुष्पाणि ?" इति छात्राः पृष्टवन्तः । " भवतां स्वेदतः । ह्यः भवन्तः एतेन मार्गेण मस्तके काष्ठसञ्चान् गृहीत्वा आगतवन्तः । भवतां शरीरेभ्यः स्वेदः निपतति स्म । सः अस्यां भूमौ पतति स्म। सः भूमिं सिञ्चति स्म । श्रमजातः पवित्रः स्वेदः । कर्मणां स्वेदः । ततः पवित्रं किमस्ति ? " इति गुरुः उक्तवान् ।

i.

ii.

iii.

iv.

17. अधः दत्तमनुच्छेदं अन्ध्रभाषायां अनुवदन्तु ।  $1 \times 8 = 8$

पूर्वं उत्तानपादो नाम राजा आसीत् । तस्य सुनीति , सुरुचिः नाम द्वे पत्न्यौ आस्ताम् । सुनीतेः पुत्रः ध्रुवः । सुरुचेः पुत्रः उत्तमः । एकदा उत्तमः पितुः अङ्के उपविष्चवान् । ध्रुवः अपि पितुः अङ्कम् अधिरोढुं प्रयत्नं कृतवान् । तदा सुरुचिः तं बलात् न्यक्षिपत् । तदा खिन्नः ध्रुवः एकपादेन स्थित्वा विष्णुम् उद्दिश्य तपश्चकार । विष्णुः प्रत्यक्षो भूत्वा ध्रुवाय अत्युन्नतं ध्रुवस्थानम् अदात् ।

अधः दत्तानां प्रश्नानां समाधानानि 1 – 2 वाक्येषु लिखन्तु ।  $7 \times 2 = 14$

18. एलिसररस्य मातुलः तं किमर्थं गृहात् बहिष्कृतवान् ?

19. सुशिष्यपरिदत्तेव विद्या अशोचनीयासि मे संवृत्ता इति प्रियंवदा किमर्थमुक्तवती ?

20. पितुः विषये वेङ्कटरावस्य प्रवृत्तिः कथम् आसीत् ?

21. गुरणा सह गुरुकुलछात्राः पर्वतसमीपं गत्वा कणादं किमसूचयन् ?

22. श्रीनिवासः किं चिन्तयन् आसीत् ?

23. चन्द्रापीडेन गुरुकुले अधीतासु विद्यासु आधुनिकविद्याः काः ?

24. वनभोजनार्थं के के गजाः।

III. भावव्यक्तीकरणं – सर्जनात्मकता

अ. 25." **हिरण्यकवृत्तान्तः**"इति पाठस्य कविमुद्दिश्य लिखन्तु । $1 \times 2 = 2$

**आ. अधः दत्तानां प्रश्नानां समाधानानि 4 – 5 वाक्येषु लिखन्तु ।** $4 \times 4 = 16$

26. सन्मित्ररहितस्य जीवनं शून्यं किमर्थम् ?

27. शिशोः प्रसवसमये भवत्या कोऽपि शब्दः न करणीयः इति एलिसरः परिचारिकां कठोरं सूचयति। तत्र कारणं किम्?

28.अद्य फलितम् अनेकजन्मान्तरोपात्तम् अवदातं कर्म इति शुकनासः किमर्थमुक्तवान् इति विवृण्वन्तु?

29. भारतीयजनानां चिन्तनम् अतीव उन्नतमासीत् । तत् कथमिति लिखन्तु ?

**इ. अधः दत्तानां प्रश्नानां समाधानानि 10 -12 वाक्येषु लिखन्तु ।** $2 \times 8 = 16$

30. शिशोः मातृभाषाधिगमने मातापित्रूणां प्राधान्यं कीदृशम् ?

अथवा

वेङ्कटरावस्य स्वभावचित्रणं कुर्वन्तु ?

31. पतिगृहप्रापणसमये लोके सामान्यजनैःअनुभूयमानं दुःखं वर्णयन्तु ।

अथवा

किं जलम् उत्तमम् पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु ?

**ई. अधः दत्तेभ्यः प्रश्नेभ्यः द्वयोः समाधानानि सर्जनात्मकतया लिखन्तु ।** $2 \times 8 = 16$

32. कणादगृहं गतस्य शिष्यस्य कणादमातापित्रोः च मध्ये सम्भूतं सम्भाषणं विपुलतया लिखन्तु ।

33. वरदक्षिणानिर्मूलनाय समाजे पत्रिकायां सम्पादकीयं विरच्य प्रदर्शयन्तु इति पत्रिका सम्पादकाय लेखं लिखन्तु ।

34. **संस्कृभाषायां अनुवदन्तु ।**

జింక , నక్క స్నేహితులు ఒకనాడు జింక వేటగాని వలలో చిక్కుకుంది. కొద్దిసేపటికి నక్క జింకవద్దకు వచ్చింది. నక్క వలను మాటి మాటికీ చూచి జింకతో “ఈ బంధం చాలా గట్టిది. ఈ ఉచ్చుత్రాళ్ళు నరాలతో చేసినట్టివి. నేడు ఆదివారం. కనుక పళ్ళతో ఎట్లు తాకగలను. నీవు మనస్సులో వేరుగా తలంపనిచో నేను చెప్పేది విను. రేపు వేకువనే వస్తాను. అప్పుడు నేను ఏం చేయదగినదో తెలుపుము. ” అని వెళ్ళిపోయింది.